# Shanmukha Avarana Puja Stotram

नमामि सद्गुरुं शान्तं प्रत्यक्षशिवरूपिणम् ।
शिरसा योगपीठस्थं मुक्तिकामर्थसिद्धये ॥
सेवे सिन्दूरसन्दोहसुन्दरस्वाङ्गभास्वरम् ।
करुणापूरकल्लोलकटाक्षं गुरुदैवतम् ॥

यः स्थिरः परमः शक्त्या जगच्चैतन्यकारणम् ।
तं नमामि महादेवं सेनानीमात्मरूपकम् ॥
यस्मात्सर्वं समुत्पन्नं यस्यान्ते प्रतितिष्ठति ।
लयमेति पुनश्चैव तं देवं प्रणमाम्यहम् ॥
भूगृहं गुणरेखाढ्यं चतुर्द्वारोपशोभितम् ।
त्रिवृत्तं षोडशदलं तथाऽष्टदलकर्णकम् ॥
मन्वश्रं दिङ्मुखं कोणं वसुकोणं तथैव हि ।
बिन्दुयुक्तं महाचक्रं महासेनसुमन्दिरम् ॥

अधः कल्पतरोर्मूले कुमारस्य सुमन्दिरे ।
रत्नसिंहासनं दिव्यं अद्भुतं दैवतप्रियम् ॥
इन्द्रो मां रक्षयेत्पूर्वे आग्नेय्यामग्निदेवता ।
दक्षिणे धर्मराजोऽपि नैर्ऋत्यां निर्ऋतिश्च माम् ॥
पश्चिमे वरुणः पातु वायव्यां वायुदेवता ।
कुबेरश्चोत्तरे पायादैशान्यामीश्वरोऽवतु ॥
ऊर्ध्वे प्रजापतिः पायादधश्चानन्तदेवता ।
एवं दशदिशो रक्षां कुर्युर्मे देवतागणाः ॥
गणेशः सर्वदा पातु क्षेत्रेशः पातु सर्वदा ।
द्वारं च श्रीः सदा पातु देहलीं पातु सर्वदा ॥
गणनाथः सदा पातु दुर्गा मां परिरक्षतु ।
वटुको भैरवः पातु क्षेत्रपालोऽभिरक्षतु ॥
सह रत्या स्वपत्न्या च कामदेवोऽपि रक्षतु ।
प्रीत्या सह वसन्तोऽपि पातु मां नन्दने वने ॥
महाशास्ता सदा पातु कालभैरवरूपभृत् ।

नववीराः सदा पान्तु मम कल्याणहेतवे ॥
यन्त्रस्य पश्चिमे भागे कुमारस्य सुमन्दिरे ।
शङ्खपद्मनिधी रक्षां कुरुतां मम सिद्धये ॥
पातु मां रत्नसोपानं परमैश्वर्यशोभितम् ।
रक्षयेत्पश्चिमद्वारे कुमारस्य सुमन्दिरे ॥
सरस्वती महालक्ष्मीर्माया दुर्गा विभूतये ।
स्वधा च भद्रकाली च स्वाहा चैव वशङ्करी ॥
गौरी च लोकधत्री च वागीश्वर्यादयो मम ।
एता मञ्चस्थिताः सर्वा रक्षां कुर्वन्तु सर्वदा ॥
पाषाण्डकारिणो भूता भूमौ ये चान्तरिक्षगाः ।
दिवि लोके स्थिता ये च ते नश्यन्तु शिवाज्ञया ॥

सदैवानन्दरूपीस्याद्ब्रह्मरूपश्च षण्मुखः ।
कार्तिकेयो बाहुलेयः स साक्षाच्छेष एव हि ॥
नवावरणसंयुक्तो नवरूपी च नायकः ।

साक्षात्सेनापतिः स्कन्दः कुमारो गुरुरूपभृत् ॥

पञ्चब्रह्मस्वरूपी स्यात् पञ्चप्राणैकलक्ष्यकः ।

आत्मरूपी च भगवान् स्वयंज्योतिर्विभुः श्रियः ॥

आश्रितामरवृक्षोऽयं महाप्रभुरितीरितः ।

महेन्द्रेण च धत्रा च विष्णुना संस्तुतश्च यः ॥

तारकारिः स भगवान् भर्गो देवः सुधाकरः ।

कैलास्यस्योत्तरे भागे मेरुमध्ये सुमध्यमे ॥

सुन्दराख्ये च सुद्वीपे चिन्तामणिसुवेष्टिते ।

शोभने नगरे दिव्ये ब्रह्मरूपे महोज्ज्वले ॥

नवरत्नमयोपेते नानालङ्कृतिवैभवे ।

महार्हे चासने दिव्ये सवयंज्योतिरलङ्कृते ॥

स्कन्दः कौमाररूपी च भक्तानामभयङ्करः ।

वीरासने सुखासीनो ज्ञानशक्त्यात्मकः प्रभुः ॥

वामे च सव्यभागे चाप्यम्बिकायुक्तलक्षणः ।

दक्षिणाभिमुखं यस्य परमेश्वररूपकम् ॥

तं वन्दे गुरुनथाख्यं स्वामिनाथं प्रभुं स्वयम् ।
ब्रह्मविष्णुशिवाख्यानामात्मज्योतिःस्वरूपवान् ॥
सुब्रह्मण्योऽम्बिकापुत्रः स्कन्दस्त्वच्युत एव सः ।
कोटिमन्मथलावण्यं भास्करद्युतिसप्रभम् ॥
सोमशीतलसौम्यं च मनोऽभीष्टप्रदायकम् ।
अनाथनाथं महितं वैद्यनाथं भिषग्वरम् ॥
स्थाणुं विश्वेश्वरं वन्द्यं लोकनाथनमस्कृतम् ।
श्रीवल्लीदेवसेनाभ्यां गाढालिङ्गनतत्परम् ॥
भक्तानुकम्पिनं देवं नमामि त्वां नमो नमः ।
महाशक्तिधरं देवं वृषभध्वजवत्सलम् ॥
पुनर्नमामि गौरेयं महासेनं सुवैभवम् ।
ज्ञानकैवल्यदं नित्यं शुक्लमालाधरं शिवम् ॥
मयूरेशं गणेशं च पिङ्गकेशं तथैव हि ।
डिम्भप्रडिम्भप्रमुखभक्तानामभयप्रदः ॥
नववीरैः सेव्यमानः क्षेत्रपालेन पूजितः ।

स सदा पातु भगवान् साक्षाद्ब्रह्मण्यदैवतः ॥
पुनः पुनर्नमस्तुभ्यं गुरुमूर्तेऽस्तु सन्निधौ ।
क्रौञ्चभेत्ता स भगवान् सर्वदा पातु मां विभुः ॥

॥ इति शिवम् ॥

namāmi sadguruṃ śāntaṃ pratyakṣaśivarūpiṇam |
śirasā yogapīṭhasthaṃ muktikāmarthasiddhaye ||
seve sindūrasandohasundarasvāṅgabhāsvaram |
karuṇāpūrakallolakaṭākṣaṃ gurudaivatam ||

yaḥ sthiraḥ paramaḥ śaktyā jagaccaitanyakāraṇam |
taṃ namāmi mahādevaṃ senānīmātmarūpakam ||
yasmātsarvaṃ samutpannaṃ yasyānte pratitiṣṭhati |
layameti punaścaiva taṃ devaṃ praṇamāmyaham ||
bhūgṛhaṃ guṇarekhāḍhyaṃ caturdvāropaśobhitam |
trivṛttaṃ ṣoḍaśadalaṃ tathā.aṣṭadalakarṇakam ||

manvaśraṃ diṅmukhaṃ koṇaṃ vasukoṇaṃ tathaiva hi |
binduyuktaṃ mahācakraṃ mahāsenasumandiram ||

adhaḥ kalpatarormūle kumārasya sumandire |
ratnasiṃhāsanaṃ divyaṃ adbhutaṃ daivatapriyam ||
indro māṃ rakṣayetpūrve āgneyyāmagnidevatā |
dakṣiṇe dharmarājo.api nairṛtyāṃ nirṛtiśca mām ||
paścime varuṇaḥ pātu vāyavyāṃ vāyudevatā |
kuberaścottare pāyādaiśānyāmīśvaro.avatu ||
ūrdhve prajāpatiḥ pāyādadhaścānantadevatā |
evaṃ daśadiśo rakṣāṃ kuryurme devatāgaṇāḥ ||
gaṇeśaḥ sarvadā pātu kṣetreśaḥ pātu sarvadā |
dvāraṃ ca śrīḥ sadā pātu dehalīṃ pātu sarvadā ||
gaṇanāthaḥ sadā pātu durgā māṃ parirakṣatu |
vaṭuko bhairavaḥ pātu kṣetrapālo.abhirakṣatu ||
saha ratyā svapatnyā ca kāmadevo.api rakṣatu |
prītyā saha vasanto.api pātu māṃ nandane vane ||
mahāśāstā sadā pātu kālabhairavarūpabhṛt |
navavīrāḥ sadā pāntu mama kalyāṇahetave ||
yantrasya paścime bhāge kumārasya sumandire |

śaṅkhapadmanidhī rakṣāṃ kurutāṃ mama siddhaye ||
pātu māṃ ratnasopānaṃ paramaiśvaryaśobhitam |
rakṣayetpaścimadvāre kumārasya sumandire ||
sarasvatī mahālakṣmīrmāyā durgā vibhūtaye |
svadhā ca bhadrakālī ca svāhā caiva vaśaṅkarī ||
gaurī ca lokadhatrī ca vāgīśvaryādayo mama |
etā mancasthitāḥ sarvā rakṣāṃ kurvantu sarvadā ||
pāṣāṇḍakāriṇo bhūtā bhūmau ye cāntarikṣagāḥ |
divi loke sthitā ye ca te naśyantu śivājnayā ||

sadaivānandarūpīsyādbrahmarūpaśca ṣaṇmukhaḥ |
kārtikeyo bāhuleyaḥ sa sākṣāccheṣa eva hi ||
navāvaraṇasaṃyukto navarūpī ca nāyakaḥ |
sākṣātsenāpatiḥ skandaḥ kumāro gururūpabhṛt ||
pancabrahmasvarūpī syāt pancaprāṇaikalakṣyakaḥ |
ātmarūpī ca bhagavān svayaṃjyotirvibhuḥ śriyaḥ ||
āśritāmaravṛkṣo.ayaṃ mahāprabhuritīritaḥ |
mahendreṇa ca dhatrā ca viṣṇunā saṃstutaśca yaḥ ||
tārakāriḥ sa bhagavān bhargo devaḥ sudhākaraḥ |
kailāsyasyottare bhāge merumadhye sumadhyame ||

sundarākhye ca sudvīpe cintāmaṇisuveṣṭite |
śobhane nagare divye brahmarūpe mahojjvale ||
navaratnamayopete nānālaṅkṛtivaibhave |
mahārhe cāsane divye savayaṃjyotiralaṅkṛte ||
skandaḥ kaumārarūpī ca bhaktānāmabhayaṅkaraḥ |
vīrāsane sukhāsīno jnānaśaktyātmakaḥ prabhuḥ ||
vāme ca savyabhāge cāpyambikāyuktalakṣaṇaḥ |
dakṣiṇābhimukhaṃ yasya parameśvararūpakam ||
taṃ vande gurunathākhyaṃ svāmināthaṃ prabhuṃ svayam |
brahmaviṣṇuśivākhyānāmātmajyotiḥsvarūpavān ||
subrahmaṇyo.ambikāputraḥ skandastvacyuta eva saḥ |
koṭimanmathalāvaṇyaṃ bhāskaradyutisaprabham ||
somaśītalasaumyaṃ ca mano.abhīṣṭapradāyakam |
anāthanāthaṃ mahitaṃ vaidyanāthaṃ bhiṣagvaram ||
sthāṇuṃ viśveśvaraṃ vandyaṃ lokanāthanamaskṛtam |
śrīvallīdevasenābhyāṃ gāḍhāliṅganatatparam ||
bhaktānukampinaṃ devaṃ namāmi tvāṃ namo namaḥ |
mahāśaktidharaṃ devaṃ vṛṣabhadhvajavatsalam ||
punarnamāmi gaureyaṃ mahāsenaṃ suvaibhavam |
jnānakaivalyadaṃ nityaṃ śuklamālādharaṃ śivam ||

mayūreśaṃ gaṇeśaṃ ca piṅgakeśaṃ tathaiva hi |
ḍimbhapraḍimbhapramukhabhaktānāmabhayapradaḥ ||
navavīraiḥ sevyamānaḥ kṣetrapālena pūjitaḥ |
sa sadā pātu bhagavān sākṣādbrahmaṇyadaivataḥ ||
punaḥ punarnamastubhyaṃ gurumūrte.astu sannidhau |
krauncabhettā sa bhagavān sarvadā pātu māṃ vibhuḥ ||

|| iti śivam ||

www.kamakotimandali.com